रोदितुमारब्धवती, तावदस्मच्छात्रेणेवाऽऽनीतेति।"

तदाकर्ण्य कोपज्वालाज्वलित इव योगी प्रोवाच—"विक्रम-राज्येऽपि कथमेष पातकमयो दुराचाराणामुपद्रवः ?"

ततः स उवाच—

"महात्मन् क्वाधुना विक्रमराज्यम् ? वीरविक्रमस्य तु भारत-भुवं विरहय्य गतस्य वर्षाणां सप्तदश-शतकानि व्यतीतानि। क्वाधुना मन्दिरे मन्दिरे जयजयध्वनिः ? क्व सम्प्रति तीर्थे तीर्थे घण्टानादः ? क्वाद्यापि मठे मठे वेदघोषः ? अद्य हि वेदा विच्छिद्य

---

निगद्यते। पलाशाः = किंशुकाः, ते च ते पलाशिनः = तरवः, तेषां श्रेण्याम् = पङ्क्तौ पलाशानि पत्राणि वा, "पत्रं पलाशं छदनम्" इत्यमरः। घुणाक्षर-न्यायेन, काष्ठवेधकैः कृमिभिः काष्ठानुवेधे क्रियमाणे यथाऽकस्मादक्षरमिव प्रतीयते, तथा यत्रावितर्कित-कार्य-सिद्धिस्तत्रेत्थमभिधीयते। पुना रोदितुम्, "रो रि" इति लोपे "ढ्रलोपे पूर्वस्य दीर्घोऽणः" इति दीर्घः।

विरहय्य = परित्यज्य। सप्तदशशतकानि, शिवराजसमयसूचनार्थ-मिदम्। शिवराजकालिकयवनदुराचारान् वर्णयति—क्वेत्यादि। मठे मठे =

---

ही वह मुसलमान का लड़का, इस लड़की को वहीं छोड़, एक सेमर के पेड़ पर चढ़ गया और यह ब्राह्मण-बालिका पलाश वृक्षों के झुरमुट में प्रवेश कर घुणाक्षर न्याय से इधर आकर मारे भय के पुनः रोने लगी, इसी बीच हमारा छात्र इसे वहाँ ले आया।"

यह सुनकर क्रोधाग्नि की लपटों से प्रदीप्त हुए से योगिराज बोले—"विक्रमादित्य के राज्य में भी दुराचारियों का यह पापमय उपद्रव कैसा ?"

तदनन्तर ब्रह्मचारी के गुरु ने कहा—"महात्मा जी, अब विक्रम का राज्य कहाँ रहा ? वीर विक्रमादित्य को तो भारतभूमि को छोड़कर गये सत्रह सौ वर्ष व्यतीत हो गये। अब मन्दिरों में जय-जयकार कहाँ ? तीर्थों में घण्टा-

वीथीषु विक्षिप्यन्ते, धर्मशास्त्राण्युद्धूय धूमध्वजेषु ध्मायन्ते, पुराणानि पिष्ट्वा पानीयेषु पात्यन्ते, भाष्याणि भ्रंशयित्वा भ्राष्ट्रेषु भर्ज्यन्ते; "क्वचिन्मन्दिराणि भिद्यन्ते, क्वचित् तुलसीवनानि छिद्यन्ते, क्वचिद् दारा अपह्रियन्ते, क्वचिद् धनानि लुण्ठ्यन्ते, क्वचिदार्त्तनादाः, क्वचिद् रुधिरधाराः, क्वचिदग्निदाहः, क्वचिद् गृहनिपातः" इत्येव श्रूयतेऽवलोक्यते च परितः।

तदाकर्ण्य दुःखितश्चकितश्च योगिराडुवाच—"कथमेतत् ? ह्य एव पर्वतीयाञ्छकान् विनिर्जित्य महता जयघोषेण स्वराज-

प्रतिच्छात्रालयम्। "मठश्छात्रादिनिलयः" इत्यमरः। वेदाः = वेदपुस्तकानि। विच्छिद्य = विपाटच, वीथीषु = पथिषु, उद्धूय = उत्तोल्य। धूम एव ध्वजो येषां ते तेषु = वह्निषु। ध्मायन्ते = ज्वाल्यन्ते। पुराणानि = ब्रह्मवैवर्त्तादीनि। पिष्ट्वा = चूर्णीकृत्य। भाष्याणि = सूत्रव्याख्यानानि वात्स्यायनादिनिर्मितानि। भ्राष्ट्रेषु = भर्जनपात्रेषु "क्लीबेऽम्बरीषं भ्राष्ट्रो ने"त्यमरः। "भाड" इति हिन्दी। दाराः = भार्याः। दृ विदारण इत्यस्माण्णिजन्तात् "दारजारौ कर्त्तरि णि लुक् चे"ति घञ्, "दाराक्षतलाजासूनां बहुत्वम्"।

"क्रोडा हारा तथा दारा त्रय एते यथाक्रमम्।
क्रोडे हारे च दारेषु शब्दाः प्रोक्ता मनीषिभिः॥"

इति हेमचन्द्रानुसारेण टाबन्तोऽप्ययम्। यथा च "क्षारात्रय" इति पद्ये दृश्यते तथा टाबन्तस्यैकवचनादिष्वपि प्रयोगस्तदिष्टोऽवधार्यते। क्वाधुनेत्यारभ्य परित इत्यन्तं समतानामगुणो दण्डिमते। प्रसादस्तु सर्वसम्मतः। रीतिर्वैदर्भी।

निनाद कहाँ ? मठों में वेदध्वनि कहाँ ? आज तो वेद की पुस्तकें फाड़-फाड़ कर सड़कों पर बिखेरी जाती हैं, धर्मशास्त्र के ग्रन्थ उछाल ( उठा ) कर आग में झोंके जाते हैं, पुराण की पुस्तकें पीस ( फाड़ ) कर पानी में फेंकी जाती हैं और भाष्यग्रन्थ तोड़-मरोड़ कर भाड़ों में झोंके जाते हैं। "कहीं मन्दिर तोड़े जाते हैं, कहीं तुलसी-वृक्ष काटे जाते हैं। कहीं स्त्रियों का अपहरण किया जाता है और कहीं धनसम्पत्ति लूटी जाती है। कहीं करुण क्रन्दन है तो कहीं रुधिर की धारा, कहीं अग्निकाण्ड है और कहीं गृहध्वंस। चारों ओर यही सुनाई देता है और यही दिखाई देता है।

यह सुनकर खिन्न और विस्मित हुए योगिराज ने कहा—"यह कैसे ?

धानीमायातः श्रीमानादित्य-पदलाञ्छनो वीरविक्रमः। अद्यापि तद्विजयपताका मम चक्षुषोरग्रत इव समुद्धूयन्ते, अधुनापि तेषां पटहगोमुखादीनां निनादः कर्णशष्कुलीं पूरयतीव, तत् कथमद्य वर्षाणां सप्तदश-शतकानि व्यतीतानि" इति ?

ततः सर्वेषु स्तब्धेषु चकितेषु च ब्रह्मचारिगुरुणा प्रणम्य कथितम्—

"भगवन् ! बद्ध-सिद्धासनैर्निरुद्ध-निश्वासैः प्रबोधितकुण्डलिनीकैर्विजित–दशेन्द्रियैरनाहत–नाद–तन्तुमवलम्ब्याऽऽज्ञाचक्रं संस्पृश्य,

---

पर्वतीयान्=पर्वतप्रान्तस्थान्। स्वराजधानीम्=उज्जयिनीम्। आदित्य-पदलाञ्छनः=आदित्यपदविभूषितः। लक्ष्मवाची लाञ्छनशब्दः "कलङ्काङ्कौ लाञ्छनं च चिह्नं लक्ष्म च लक्षणमि"त्यमरः। समुद्धूयन्ते=कम्पमाना विराजन्ते। पटह-गोमुखादीनाम्=वाद्यविशेषाणाम्। पटहः=नगारा इति गोमुखम्=तुरही च इति हिन्दी। भाविकालङ्कारोऽतीतस्य प्रत्यक्षायमाणत्वात्।

भवादृशैः=योगनिरतैः, कालस्य वेगः=गतिर्न ज्ञायत इत्यन्वयः। भवादृशान् विशिनष्टि—बद्धं सिद्धासनम्=योगशास्त्रीय आसनविशेषो यैस्तैः। निरुद्धाः=अन्तर्नियमिताः, निश्वासाः=प्राणा यैस्तैः। प्रबोधिता=उद्द्योतिता, कुण्डलिनी=पराशक्त्यभिधेया नाडीरूपा प्रधानव्यक्तिस्थानम्, यैस्तैः। विजितानि=वशीकृतानि, दशेन्द्रियाणि यैस्तैः। वाक्-पाण-पाद-पायूपस्थानि

---

श्रीमान् आदित्यपद विभूषित वीर विक्रम अभी कल ही पर्वत प्रान्त निवासी शकों को जीतकर, महान् जय-जयकार के साथ अपनी राजधानी उज्जयिनी आये हैं। आज भी उनकी विजयपताकाएँ मेरे नेत्रों के सामने फहरा सी रही हैं, इस समय भी उनके नगाड़े, तुरही आदि बाजों की ध्वनि मेरे कर्णविवरों को पूर्ण सी कर रही है, फिर आज सत्रह सौ वर्ष कैसे बीत गये ?"

योगिराज के ये वचन सुनकर सबके स्तब्ध और विस्मित हो जाने पर ब्रह्मचारी के गुरु ने प्रणाम कर कहा—"भगवन् ! सिद्धासन बाँध कर, साँस रोककर, कुण्डलिनी को जगाकर, दसों इन्द्रियों पर विजय प्राप्त कर, अनहद नाद

चन्द्रमण्डलं भित्त्वा, तेजःपुञ्जमविगणय्य, सहस्रदलकमलस्यान्तः प्रविश्य, परमात्मानं साक्षात्कृत्य, तत्रैव रममाणैर्मृत्युञ्जयैरानन्दमात्रस्वरूपैर्ध्यानावस्थितैर्भवादृशैर्न ज्ञायते कालवेगः।

पञ्च कर्मेन्द्रियाणि, चक्षुः-श्रोत्र-घ्राण-रसन-त्वगाख्यानि पञ्च ज्ञानेन्द्रियाणि। **अनाहतश्चासौ नादः** तस्य **तन्तुं**=तन्तुतुल्यां सूक्ष्मावस्थालतिकाम्। सुषुम्णामध्ये स्थितं तुरीयं पद्ममनाहतनाम्ना योगशास्त्रे प्रसिद्धम्, तदुत्थो नादोऽनाहतनादः। **आज्ञाचक्रम्**=भ्रुवोर्मध्ये द्विदलात्मकं चक्रम्। **संस्पृश्य**=ध्यानावलम्बनं कृत्वा। **चन्द्रमण्डलम्**=ततः परवर्ति षोडशदलात्मकं चक्रम्। **तेजःपुञ्जम्**=सोमचक्रवर्तिनं महाप्रकाशम्। **सहस्रदलकमलस्य**=ब्रह्मरन्ध्रवर्त्तिनः सहस्रारचक्रस्य। **परमात्मानम्**=परं ब्रह्म। **तत्रैव**=ब्रह्मणि। **रममाणैः**=विहरद्भिः। अनिर्वचनीयमानन्दमुपभुञ्जद्भिरिति यावत्। **मृत्युञ्जयैः**=स्वायत्तीकृतकालवृत्तिभिः, **आनन्दमात्रस्वरूपैः**=आनन्दमये ब्रह्मणि लीनत्वात् तत्स्वरूपैः यत् तु योगशास्त्रमात्रप्रसिद्धानां शब्दानामुपादानं तच्छास्त्रानभिज्ञस्य बोधाजनकमित्यप्रतीतत्वदोषदुष्टमिदमिति—तन्न, अत्रत्यगद्यस्य योगशास्त्रोक्त-ध्यानप्रकारे व्युत्पत्त्याधायकत्वादेतदर्थमेव समुल्लिखितत्वाच्च। अत एव "न सा विद्या न तच्छास्त्रमि"त्यादिना साहित्यस्य व्युत्पत्त्यापि तदर्थस्य सर्वमयत्वं सूचितम्। कथमन्यथा "बहिर्विकारं प्रकृतेः पृथगि"त्यादीनां 'वागर्थाविव संपृक्तावि"त्यादीनां च न तद्दोषदुष्टत्वमित्यलमसदावेशेन।

(सुषुम्णा के मध्य में स्थित, योगशास्त्र में अनाहत नाम से प्रसिद्ध चतुर्थ पद्म से उत्पन्न होने वाले नाद ) के तन्तु का अवलम्बन कर, ( भौंहों के बीच में स्थित द्विदलात्मक) आज्ञाचक्र को ध्यान का लक्ष्य बनाकर, षोडशदलात्मक चक्र 'चन्द्रमण्डल' को भेद कर, चन्द्रचक्रवर्ती महाप्रकाश का तिरस्कार कर, सहस्रारचक्र के अन्दर प्रविष्ट हो परब्रह्म का साक्षात्कार कर उसी में रमण करनेवाले, मृत्यु के विजेता, आनन्दस्वरूप और ध्यान में स्थित आप जैसे **महात्माओं को समय का वेग प्रतीत नहीं होता।** उस समय आपने